अमरकोश-विष्णुसहस्रनामस्तोत्रयोर्विष्णुपर्यायपदार्थानां तुलनात्मकमवलोकनम् ।

Midhun P.
Research Scholar, Dept. Of Sanskrit Vyakarana, SSUS Kalady

संक्षेपः

श्रीमदमरसिंहेन विरचिते अमरकोषे विद्यमानानि विष्णुपर्यायान् स्वीकृत्य, श्रीमद्विष्णुसहस्रनामस्तोत्रस्य श्रीशङ्कराचार्यकृते भाष्ये, अमरकोशव्याख्यायाम् अमरसुधायां च तेषां पदानाम् अर्थप्रतिपादने तुलनात्मकम् अध्ययनं क्रियते । उभयत्र दृष्टानां पदानां अर्थविवरणे यथा कुत्रचित् भिन्नता दृश्यते, तद्वत् अपरत्र सुधाकारेण आचार्यमतम् अनुगम्यते च ।

उपोद्घातः

कोशाःयद्यपिबहवःसंजाताः,तथापितेषुपरमोत्कृष्टत्वम्अमरसिंहविरचितामरकोशस्यैव लब्धम् । कस्यापि पदस्य अर्थस्य लिङ्गस्य वा सन्देहे अमरकोशात् तद्वाक्यमुद्धृत्य 'इत्यमरः' इति यदा उच्यते, तदा सः सन्देहः परिहृतः इति मन्यते इत्यस्मादेव तत्सिद्धं निस्सीमं प्रामाण्यं लोकादरश्च कियानिति ज्ञातुं शक्यते । अमरकोशव्याख्यानानि भिन्नभिन्नभाषासु असङ्ख्यानि सन्ति यत्र च संस्कृतव्याख्याः अधिकतया श्लाघनीयाः दृश्यन्ते । अमरकोशव्याख्यासु सुप्रसिद्धा वर्तते रामाश्रमी इत्यपरनामिका सुधाव्याख्या, यस्याः कर्ता विद्यते सिद्धान्तकौमुदीकारस्य श्रीमद्भट्टोजिदीक्षितस्य पुत्रः भानुजिदीक्षितः । अत एव भानुजिभट्टीयम् इत्यपि नाम अस्याः व्याख्यायाः ।

लब्धप्रचारेषु बहुषु सहस्रनामस्तोत्रेषु प्रथमस्थानमावहति श्रीमन्महाभारतस्य १४९-तमाध्यायात्मकं श्रीविष्णुसहस्रनामस्तोत्रम् । एतद्व्याख्यानेषु च प्रस्थानत्रयीभाष्यकर्तुः श्रीशङ्कराचार्यस्य भाष्यमेव प्रसिद्धं वर्तते । एतद्भाष्यं पुरस्कृत्य अमरकोशोक्ताः विष्णुपर्यायानां पदार्थाः अवलोक्यन्ते ।

विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः ।
दामोदरो हृषीकेशः केशवो माधवः स्वभूः ॥
दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः ।
पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः ॥
उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः ।
पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः ॥
देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः
वनमाली बलिध्वंसी कंसारातिरधोक्षजः ॥
विश्वम्भरः कैटभजिद् विधुः श्रीवत्सलाञ्चनः ।

इत्येवं ३९ नामानि कोशोक्तानि ।

इदं नामलिङ्गानुशासनं, विष्णुस्तुतिरूपं सहस्रनामस्तोत्रं च स्वपथि कालमतिक्रम्य तिष्ठतः। किन्तु कस्यचन स्तोत्रग्रन्थस्य कोशग्रन्थस्य च संपूर्णे तारतम्ये काचित् साङ्गत्यन्यूनता यद्यपि स्यादेव, तथापि व्यावहारिकदिशा, तयोरर्थप्रतिपादने कः विशेषः इति परिशीलनेन तत्तच्छब्दोत्पत्तिं तेषां व्यावहारिकस्थितिं चाधिकृत्य कश्चिदवबोधो जायेत इति धिया उक्तग्रन्थद्वयविषये भानुजिदीक्षितकृतसुधाव्याख्यां विष्णुसहस्रनामशाङ्करभाष्यं चाऽऽश्रित्य कस्मैचित् तुलनात्मकाध्ययनाय यत्नः क्रियते ।

विष्णुः

सहस्रनामसु द्वितीयं, २५८ तमं, ६५७ तमं च इदं नाम । विष्लृ (१०९५) व्याप्तौ इति धातोः 'विषेः किच्च' इत्यौणादिकः नुप्रत्ययः । विशति कार्याणि प्रविशति सर्वत्र व्याप्नोति इति विष्णुः ।

"यस्माद्विष्टमिदं विश्वं यस्य शक्त्या महात्मनः ।
तस्मात् स प्रोच्यते विष्णुर्विशेर्धातोः प्रवेशनात् ॥" इति तैत्तिरीयाऽऽरण्यके ।

सुधाव्याख्यायामपि एतत्समानतया, वीवेष्टि इति विष्णुः इत्युक्तम् । किन्तु पूर्वोक्तेषु त्रिषु द्वितीयतृतीयस्थलेषु अन्यथा व्याख्यातं शङ्करेण । त्रिभिः पदैः इदं विचक्रम इति विष्णुः, विष्णुर्विक्रमणाद् इति यास्कोक्तेः । त्रिविक्रमो वामनमूर्तिः । कान्त्या भुवनं व्याप्नोति इत्यनेनापि विष्णुः । "आदित्यानामहं विष्णुः" इति भगवद्वचनं च ।

नारायणः

शाङ्करभाष्ये त्रिधा व्याख्यातमिदम् । १, "आपो नारमिति प्रोक्ताः" इति मनुवचनमनुसृत्य नारं जलम् । नारं जलम् अयनम् आश्रयः यस्य सः नारायणः । २, नरः आत्मा । नरे आत्मनि जातानि नाराणि आकाशादीनि अयनं यस्य सः नारायणः । कार्यरूपाणि आकाशादीनि कारणात्मनः ईश्वरस्य अयनम् आश्रयः इत्यतः नारायणः इति । ३, नराणां समूहः नारम् , अनन्ताः आत्मानः । प्रलयकाले तेषाम् अयनम् इत्यर्थे नारायणः इति । अत्र, नारस्य अयनम् इति तत्पुरुषे, कथं पुंस्त्वम् इत्यत्र सहस्रनामव्याख्याकारः नीलकण्ठः समाधत्ते, 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इति महाभाष्योक्तेः पुंस्त्वम् इति । सुधाकारेण तु अत्र नार-अयनपदयोः तत्पुरुषं विहाय बहुव्रीहिरेवाऽऽश्रियते । यथा, नराणां समूहो नारं, नारम् अयनं यस्य सः नारायणः इति । अयं नरान् अधिवसति इत्यर्थः । तत्र, "नराः अयनं यस्य सः इति विग्रहे पृषोदरादित्वाद् नरायणः अपि" इति यद् मुकुटवचनं तत् चिन्त्यम् इति वदता सुधाकारेण शब्दार्णवकोशं त्रिकाण्डकोशं च उद्धृयते यथाक्रमं,

'अथ नरायणो विष्णुरूर्ध्वकर्मा नरायणः । '

'वासुर्नरायणपुनर्वसुविश्वरूपाः । '

तेन पुनः मुकुटमाश्रित्य अस्य व्युत्पत्तिर्दीयते यथा, नराज्जाताः नाराः आपः । अथ वा नराज्जातानि नाराणि तत्त्वानि । एवं च, नाराः (आपः) नाराणि (तत्त्वानि) वा अयनम् (आश्रयः) यस्य सः नारायणः । अपि च सुधाकारेण नान्तं गम्यते, नारम् अयते जानाति वा इति नारायणः, नारम् आययति प्रवर्तयति वा इति नारायणः इति तत्र पुनर्व्याख्या दृश्यते ।

कृष्णः

सहस्रनामसु ५६ तमं नाम । आकर्षति दृष्टिम् इति कृष्णः श्यामवर्णः । कृष्णः (श्यामवर्णः) अस्य अस्तीति कृष्णः । "कृष्णो वर्णश्च मे यस्मात्तस्मात्कृष्णोऽहमर्जुन" इति व्यासोक्तिः । कृष विलेखने इत्यस्मात् औणादिकः नक् । वर्णार्थकात् कृष्णशब्दाद् मतुप् , गुनवचनत्वात् मतुब्लोपश्च । अपि च, कर्षति अरीन् इत्यर्थे बाहुलकाद् वर्ण विनापि कृष धातोः नक्प्रत्ययो भवितुमर्हतीति सुधाकारः । अत्र, कृषिः भूवाचकः, शब्दे णश्च निर्वृतिवाचकः; "विष्णुस्तद्भावयोगाच्च कृष्णो भवति शाश्वतः" इति

व्यासवचनात् सदानन्दात्मकत्वात् कृष्णः इति शाङ्करभाष्यम्। अथ वा, कृषिः सत्ता ; न आनन्दः ; कृषिश्च नश्च इति कर्मधारये पृषोदरादित्वात् कृष्णः इति । तत्र, 'कृषिरुत्कृष्टवचनो नश्च निर्वृतिवाचकः। तयोरैक्यं परम् ब्रह्म कृष्ण इत्यभिधीयते।' इति उपनिषद्वचनं स्वीकृत्य उत्कृष्टा निर्वृतिरस्मात् इति मुकुटोक्तव्युत्पत्तिः । सुधाकारस्त्वत्र मेदिनीमप्युद्धरति-

'कृष्णः सत्यवतीपुत्रे वायसे केशवेऽर्जुने।
कृष्णा स्याद् द्रौपदी नीली पिप्पलीद्राक्षयोरपि ॥'

वैकुण्ठः

सहस्रनामसु ४०५ तमं नाम। कुठि (३४२) गतिप्रतिघाते इत्यस्माद् अप्रत्ययः । कुण्ठा गतिप्रतिहतिः । विविधा कुण्ठा विशेषेण कुण्ठा वा विकुण्ठा इति भाष्यम्। प्रादिसमासः। जगत्सृष्ट्यारंभे विश्लिष्टानि स्वच्छन्दगतीनि पञ्चभूतानि परस्परं संश्लेषयन् तेषां गतिं प्रतिबध्नाति इति विकुण्ठाया: कर्ता वैकुण्ठः । कर्तृसंबन्धे 'तस्येदम्' इत्यण्प्रत्ययः।

अत्र सुधाव्याख्या तु भिन्नतया दृश्यते, यथा–

विकुण्ठायाः अपत्यं वैकुण्ठः । विगता कुण्ठा (नाशः) अस्य इति वैकुण्ठः। स्वरूपत्वेन आश्रयत्वेन वा विकुण्ठं ज्ञानं स्थानं वास्त्यस्य इति वैकुण्ठः । विकुण्ठानां (जीवानाम्) अयं नियन्ता इत्यतो वैकुण्ठः । विगता कुण्ठा अस्माद् इति वैकुण्ठः ।

विष्टरश्रवाः

विष्टरे श्रूयते इति विष्टरश्रवाः । इदं सहस्रनामसु नान्तर्भवति । विष्टरो वृक्षः। तरुश्चात्र अश्वत्थोऽभिमतः इति सुधाकारः।

दामोदरः

सहस्रनामसु ३६८ तमं नाम। अत्र, दाम उदरे यस्य सः इत्येव सुधाव्याख्या। भाष्ये तु किञ्चिदधिकतया विवृणुते यथा, रक्ष्यते अनेन (स्वतन्त्रगतिजान्नाशात्) इति दाम पाशः । उद्गच्छति (भोजने) इत्युदरम् । दाम यशोदयार्पितमुदरे यस्य सः दामोदरः इति। दामानि लोकमालाः उदरे यस्य सः इति वा। अथ वा, दमो योगः ; उत्पूर्वात् ऋ गतौ इत्यस्मात् अप्प्रत्यये उदरः इति । उत्कृष्टगतिरित्यर्थः । दमेन उदरः दमोदरः, तत्र भवः

दामोदरः । योगगत्या प्राप्यः इत्यर्थः ।

हृषीकेशः

सहस्रनामसु ४६ तमं नाम । हृष्यति विषयैः इति हृषीकमिन्द्रियम् । हृषीकाणामीशः क्षेत्रज्ञरूपः हृषीकेशः । हृषीकाणि वशे यस्य सः इत्यपि भाष्यम् । हृषीकेशः परमात्मा । अथ वा, हृष्टाः जगत्प्रीतिकराः केशाः रश्मयः (सूर्येन्दुरूपस्य) यस्य सः हृषीकेशः ।

केशवः

सहस्रनामसु ४६ तमं नाम। प्रशस्ताः केशाः सन्त्यस्य इति केशवः । को ब्रह्मा । अः विष्णुः । ईशः शिवः । कश्च अश्च ईशश्च केशाः त्रिमूर्तयः । ते वशे अधीनतायां वशाः अधीनाः वा यस्य सः केशवः मूर्तित्रयातिरिक्तः। अत्र, 'शंभोः पितामहो ब्रह्मपिता शक्राद्यधीश्वरः' इति इति पाद्मोक्तेः केशौ (ब्रह्माणं शिवं च) वाति (वा गतौ) इति केशवः इति व्याख्यायते सुधाकारेण। अथ वा, कुत्सिताः केशाः अस्य इति केशी असुरः। केशिनं हतवान् केशवः। अत्र, वध हिंसायाम् इति धातोः या व्युत्पत्तिः सा शङ्करेण स्वीक्रियते सुधाकारेण निराक्रियते च। शङ्करेण अत्र हरिवंशोक्तिरुद्धियते-

'यस्मात्त्वयैष दुष्टात्मा हतः केशी जनार्दन।
तस्मात्केशवनामा त्वं लोके ख्यातो भविष्यसि ॥'

माधवः

मायाः धवः श्रियाः पतिः। सहस्रनामसु ७२ तमं, १६८ तमं, ७३५ तमं च नाम । अत्र मधुशब्देन मधुशब्दोपलक्षिता मधुविद्या लक्ष्यते इति भाष्यम् । तत्र भवः तदवबोध्यो माधवः । १६८ तमे नामनि व्याख्याने 'मा विद्या च हरेः प्रोक्ता तस्या ईशो यतो भवान्। तस्मान्माधवनामासि' इति हरिवंशोक्तिरुद्धृता दृश्यते। ७३५ तमे स्थले मन्यते ज्ञायते इति मधुः यदुवंशजो राजा ; मधुकुले जातत्वाद् माधवः इति । एतद्रीत्या सुधाकारेणापि उच्यते यथा, यदोः ज्येष्ठः पुत्रो मधुः, पुण्डरीकम्तद्वंश्याः सर्वे अपि माधवाः इत्यतः मधोरपत्यं माधवः इति।

स्वभूः

सहस्रनामसु स्वभूः इति नाम न दृश्यते, किन्तु स्वयम्भूः इति वर्तते । पूर्वत्र

स्वशब्दात् उत्तरत्र स्वयमित्यव्ययाच्च क्यप् ।

पुण्डरीकाक्षः

पुण्डरीकम् इव अक्षिणी यस्य सः पुण्डरीकाक्षः इति सुधा । किन्तु भाष्ये अन्यथाप्युच्यते यथा, पुण्डरीकं नाम हृदयपुण्डरीकम् ; अक्षः व्यापकः ; हृदयपुण्डरीकं व्याप्नोति इति पुण्डरीकाक्षः । सुधायां पुनः, पुण्डरीकं व्याप्नोति तत्र उपलक्ष्यते इति वा पुण्डरीकाक्षः ; अथ वा, पुण्डरीकं लोकात्मकम् अक्षतीति , पुण्डरीकं क्षायति इति वा पुण्डरीकाक्षः इत्यपि ।

गोविन्दः

गां भूमिं वाचं स्वर्गं वेदं वा विन्दतीति गोविन्दः इति सुधायाम् । वराहरूपेण प्रलयाम्बुधेः भूमेरुद्धरणात् कामधेनोरैश्वर्यप्राप्तेः इद्रेण स्वर्गस्य निवेदनात् मत्स्यरूपेण वेदलक्षणवाचः उद्धरणाद्वा इति । 'अहं किलेन्द्रो देवानां त्वं गवामिन्द्रतां गतः' इति हरिवंशोक्तेः धेनूनां स्वामित्वाद् गाः (स्वत्वेन) विन्दतीति गोविन्दः इति भाष्यम् । 'गोविन्दो वासुदेवे स्याद्गवाध्यक्षे बृहस्पतौ' इति मेदिनी च ।

गरुडध्वजः

गरुडः ध्वजः (चिह्नं) यस्य सः गरुडध्वजः इत्येव सुधा । अत्र, गरुद्भिः डयते इति गरुडशब्दव्युत्पत्तौ 'पृषोदरादित्वात् पूर्वपदान्त्यलोपः इति भट्टोजिशिष्यः' इति सुधाकारमुद्दिश्य वदति सहस्रनामव्याख्याकारो नीलकण्ठः । गरं विषं हन्तीति गरुडः इत्यपि भाष्यकारः ।

अच्युतः

न विद्यते च्युतं स्खलनं स्वपदात् यस्य सः इति सुधाकारः । स्वरूपस्य स्वसामर्थ्यस्य च नाशो नास्तीति । नाम्नः अस्य आवृत्तिस्थले भाष्यकारस्तु अविद्यमानं च्युतं विकारः यस्य सः इति व्युत्पत्तिं प्रदर्शयति । जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, नश्यति इति षड्भावविकाररहितः इत्यर्थः ।

विष्वक्सेनः

विषूची सेना यस्मात्सः इति भाष्यं, यस्य सः इति सुधा च । सर्वतः पलायमाना दैत्यसेना रणे यस्मात्सः इति । 'विष्वक् विश्वक् स्मृतो विज्ञैर्विषुवं विशुवं तथा' इति

द्विरूपकोशात् तालव्यमध्योऽपि शब्दः साधुः इति सुधाकारः। तत्र, 'पूर्वपदात्संज्ञायामगः' इति णत्वे कर्तव्ये परस्य 'खरि च' इति चर्त्वस्य असिद्धत्वात् गकारान्तत्वे सूत्रेणानेन णत्वं न स्याद् इति यद् मुकुटोक्तं तत्सुधाकारेण निराक्रियते, 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यधिकारात् साकारव्यवधाने णत्वप्राप्तेरेव अभावात्।

जनार्दनः

अत्र जनान् (दुर्जनान्) अर्दयति इति (अर्द हिंसायाम्), जनैः अर्द्यते (अर्द गतौ याचने च) इति वा जनार्दनः इत्युभयत्र समाना व्युत्पत्तिर्दृश्यते। जनाः समुद्रस्थदैत्यभेदाः, तेषामर्दनः जनार्दनः इत्यपि सुधाकारः।

पद्मनाभः

पद्मं नाभौ यस्य सः इति सुधा। सहस्रनामसु ४७ तमं, १९७ तमं, ३४७ तमं च इदं नाम। तत्र यथाक्रमं, पद्मं नाभौ यस्य सः पद्मनाभः ; पद्म इव नाभिः यस्य सः पद्मनाभः ; पद्म एव नाभिः पद्मनाभिः, तत् निवासस्थानम् अस्य इति पद्मनाभः इति व्याख्यातम्। योगीनां हृदयपद्मस्य नाभौ वर्तते इत्यतः अपि पद्मनाभः। अत्र प्रक्रियासर्वस्वकार: तकारघटितरूपस्य असाधुत्वमपि बोधयति –

"पद्मं हि पद्यतेरुक्तं न पतेर्माधवादिभिः।
स्पष्टो दकारश्चोदीच्यां तकारोक्तिरतो भ्रमः॥" इति।

वासुदेवः

सहस्रनामसु त्रिवारमिदमुच्यते (३३३,६९५,७०९)। वसुदेवस्यापत्यम् ; वसतीति वासुः , वासुश्चासौ देवश्च वासुदेवः इति व्याख्याद्वयम् उभयत्र समानम्। 'वासुर्नरायणपुनर्वसुविश्वरूपाः' इति त्रिकाण्डकोशाद् वासुरपि नारायणः इति सुधाकारः। 'सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः। ततोऽसौ वासुदेवेति विद्वद्भिः परिगीयते' इति विष्णुपुराणं च। वसुदेवे शुद्धान्तःकरणे प्रकाशते इति वा वासुदेवः इत्यपि भानुजिदीक्षितः।

देवकीनन्दनः

देवक्याः नन्दनः। तत्र सुधाकारः वदति – देवकशब्दस्य तदपत्ये लक्षणया वृत्तौ 'पुंयोगादाख्यायाम्' इति ङीष्। अस्य सूत्रस्य अत्र कथं प्रवृत्तिः इति शङ्कायां हरदत्तादीनुद्धृत्य वदति,'नहि तत्र दाम्पत्यलक्षण एव पुंयोगः, किन्तु जन्यत्वाद्यपि' इति

। अत एव 'प्राक्केकयीतो भरतस्ततोऽभूत्' इति भट्टिः ।

उपसंहृतिः

विष्णोः पर्यायत्वेन व्यवहारे प्रसिद्धानि अमरकोशोक्तानि च कानिचन नामानि सहस्रनामसु अनन्तर्भूताः दृश्यन्ते । तानि च- विष्टरश्रवाः, दैत्यारिः, पीताम्बरः, इन्द्रावरजः, मधुरिपुः, बलिध्वंसी, कंसारातिः, विश्वम्भरः, कैटभजित्, विधुः इति । कानिचिच्च किञ्चिद्व्यत्यासेन दृश्यन्ते यथा, स्वभूः स्वयंभूः इति, शार्ङ्गी शार्ङ्गधन्वा इति, चक्रपाणिः चक्री इति, श्रीवत्सलाञ्चनः श्रीवत्सवक्षाः इति च । बहुषु स्थलेषु सुधाकारेण शाङ्करभाष्यं संपूर्णतया आश्रितं दृश्यते । केशव इत्यादिनामानां व्युत्पत्तिविवरणस्थले शङ्करोद्धृतान् विष्णुपुराणादिग्रन्थान् यथातथं परामृशति च । केषुचिच्च स्थलेषु केषाञ्चिन्नामानां भिन्नतया व्युत्पत्तिर्दीयते । व्यवहारदिशा विष्णौ एव अन्वितानि पीतांबरादीनि (व्यवहारे विष्णुपदार्थत्वेनैव तेषामुपयोगः) कानिचिन्नामानि सहस्रनामसु न दृश्यन्ते ; तदितरत्र अन्वेतुं शक्यानि बहूनि नामानि अमृतः, आदित्यः, विद्वान्, योगी, लक्ष्मीः इत्यादीनि दृश्यन्ते च। रामनाम विष्णुपर्यायत्वेन अमरे न दत्तम् इति विषयत्स्तु चिन्त्यः । अपि च अनेनाध्ययनेन एतदपि ज्ञायते यत्, दार्शनिकरीत्या आचार्यस्य या अर्थप्रतिपादनरीतिः सा सुधाव्याख्यायामपि प्रतिबिम्बिता दृश्यते इति ।

सहायकग्रन्थसूची

१, अमरकोशः (अभिनवराजलक्ष्मीटीकासहितः), अमरसिंहः, प्रो. बालशास्त्री, चौखंबा सुरभारती प्रकाशन्, वाराणसी, २०१७

२, अमरकोशः (पारमेश्वरीव्याख्यासहितः)(मलयालम्), परमेश्वरन् मूसतु, टि.सि., साहित्यप्रवर्तकसङ्घम्, कोट्टयम्, १९१४

३, अमरकोशः (मलयालम्), बालकृष्णप्पणिक्कर्, के.के., एच्.&सि. पब्लिषिङ् हौस्, तृश्शूर्, १९८९

४, अमरकोशः (सुधाव्याख्यासहिता), भानुजिदीक्षितः, चौखंबा संस्कृत् प्रतिष्ठान्, देल्हि, २०१७

५,कृत्-प्रत्ययविश्लेषण, डा.गोपबन्धु मिश्र, चौखंबा संस्कृत प्रतिष्ठान,दिल्ली ,२०१२६,

विष्णुसहस्रनामम् (मलयालम्), कृष्णन् इलयतु, सि.पि., केरलसर्वकारसांस्कारिकप्रसिद्धीकरणविभागः, तिरुवनन्तपुरम्, १९८६

७,वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनीसहिता), भट्टोजीदीक्षितः, चौखंबा प्रकाशन्, वाराणसी, २००५

८, श्रीमद्विष्णुसहस्रनामस्तोत्रम् (नीलकण्ठविरचितलघुविवरणसमेतम्), डा. दिलीपकुमाररााणा, चिन्मया इन्टर्नाषनल् फ़ौण्टेषन् शोधसंस्थान्, एरनाकुलम्, २०१६

९, Complete Works of Sree Sankarachrya, Sree Sankarachrya University of Sanskrit, Kalady, २०१२